दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लाष्टमी
ज्येष्ठ 10 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-211 | 1 | मई 24, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलस्य विद्यालयेषु अधुना छात्राः कृत्रिम-प्रज्ञां (एआई) शिक्षिष्यन्ते, विशेषज्ञैः मिलित्वा सज्जः कृतः नूतनः पाठ्यक्रमः

3 बिहारराज्यशासनम् औद्योगिकविकासस्य तीव्रवर्धनम् त्रिशतपञ्चाशत् कोटिरूप्यकपरिमितेन निवेशेन द्विसहस्रत्रिशत् रोजगारावसराणां सर्जनम्

5 त्रिभाषासूत्रसन्दर्भे संस्कृतस्य स्थानम्(राष्ट्रियशिक्षानीतिः2020)

# सुभाषितम्

**अविद्यायामन्तरे वर्तमानाः,**
**स्वयं धीराः पण्डितमन्यमानाः।**
**दन्द्रम्यमाणाः परियन्ति मूढा,**
**अन्धेनैव नीयमाना यथान्धाः।।**

अर्थात्- स्वयं को धीर और पण्डित मानने वाले मूर्ख लोग नाना योनियों में भटकते हुए वैसे ही ठोकरें खाते रहते हैं, जैसे अन्धे मनुष्य के द्वारा ले जाए जाने वाले अन्धे लोग।




# प्रधानमन्त्रिणा एकपञ्चाशत्सहस्राधिकेभ्यः युवकेभ्यः नियुक्तिपत्राणि प्रदत्तानि



प्रधानमन्त्री नरेन्द्रमोदी एकोनविंशतितमे आजीविकामेलके प्रशासनस्य विभिन्नविभागेषु संस्थासु च नव-नियुक्तेभ्यः एकपञ्चाशत्सहस्राधिकेभ्यः युवकेभ्यः नियुक्तिपत्राणि प्रदत्तानि । एतत् आजीविकामेलकं सम्पूर्णदेशे सप्तचत्वारिंशत् विभिन्नस्थानेषु आयोजितः आसीत्। सम्पूर्णदेशात् चयनिताः एते नूतनकर्मचारिणः रेलमन्त्रालये, गृहमन्त्रालये, स्वास्थ्य-परिवारकल्याणमन्त्रालये, उच्चशिक्षाविभागे च इत्यादिषु विभिन्नमन्त्रालयेषु विभागेषु च स्वसेवाः प्रदास्यन्ति। प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् प्रशासनिक नियुक्तयः नागरिकाणां जीवनं श्रेष्ठतरं सुलभतरं च कर्तुं महत्त्वपूर्ण साधनम् अस्ति। प्रधानमन्त्री अवदत् यत् राष्ट्रेण स्वीयकर्मयोगिषु विश्वासः प्रदर्शितः अस्ति । अधुना तेषां दायित्वम् अस्ति यत् ते स्वीयया निष्ठया, सदाचारेण, दैनिककार्येण च तस्य विश्वासस्य मानं रक्षेयुः सदैव अधिकं दृढं कुर्युः।

श्री मोदी अवदत् यत् सम्पूर्णः विश्वः भारतस्य विकासयात्रायां सम्मिलितुं भवितुम् उत्सुकः अस्ति। प्रधानमन्त्री उक्तवान् यत् प्रत्येकः भारतीयः 'विकसितभारतस्य' निर्माणाय संकल्पेन सह कार्यं करोति। अस्य लक्ष्यस्य प्राप्तये राष्ट्र बहुषु क्षेत्रेषु निवेशं करोति। प्रधानमन्त्री यूनां कृते नूतन-वृत्यावसराणां सृजनं क्रियमाणम् इति विशेषरूपेण अवदत् ।श्रीमोदी अग्रे उक्तवान् यत् प्रत्येकः भारतीयः सप्तचत्वारिंशदधिकद्विसहस्रतमवर्षपर्यन्तं भारतं विकसितभारतं कर्तुं दृढसंकल्पेन कार्यं करोति ।प्रधानमन्त्री नवनियुक्तान् पदाधिकारिणः आईजीओटी इति कर्मयोगी-मञ्चस्य सम्यक् लाभं ग्रहीतुं प्रोत्साहितवान्। सः उक्तवान् यत् एतेन ते स्वकर्तव्यानि सरलतया अवगन्तुं समर्थाः भविष्यन्ति। श्रीमोदी विश्वासः प्रकटितवान् यत् एते नवनियुक्ताः पदाधिकारिणः राष्ट्रस्य प्रगतौ योगदानं दास्यन्ति तथा च तेषां कार्याणि निर्णयाश्च विकसितभारतस्य दृष्टिकोणं साकारयितुं महत्त्वपूर्णां भूमिकां निर्वहिष्यन्ति ।

## जयपुर- आजीविकामेलकम्

राजस्थानस्य जयपुर-जोधपुर-अजमेर-बीकानेर-चेत्यादिषु नगरेषु आजीविकामेलकं आयोजितम्, यत्र एकादशशदधिकेभ्यः युवकेभ्यः नियुक्तिपत्राणि वितरितानि । रेलमन्त्री अश्विनी वैष्णवः राज्यस्तरीय - आजीविकामेलके सहभागित्वं कृतवान्। जयपुरे आयोजिते कार्यक्रमे श्रीवैष्णवः सभां सम्बोधयन् अवदत् यत् रेलविभागे षष्टिसहस्राधिकैकलक्षपदेषु नियुक्ति प्रक्रिया प्रचलति, यस्मिन् चत्वारि कोट्यधिकाः अभ्यर्थिनः सहभागं कुर्वन्ति ।

## पञ्जाब-आजीविकामेलकम्

पञ्जाब-राज्यस्य कपूरथला-पटियाला चेत्येतयोः द्वयोः स्थलेषु उन्नविंशतितमं आजीविकामेलकं आयोजितम् यत्र एकाशीत्यधिकद्विशत नव-लाभार्थिभ्यः नियुक्ति-पत्राणि वितरितानि। कपूरथला स्थिते आर.सी.एफ.-संस्थाने, केन्द्रीय-पेट्रोलियम-प्राकृतिक वात्येन्धन-मन्त्री हरदीप-पुरी कार्यक्रमस्य अध्यक्षतां कुर्वन् उक्तवान् यत् आजीविकामेलकं एकम् सुदृढं राष्ट्रिय-संस्थानरूपेण परिवर्तितम् अस्ति, यत् पारदर्शितां तथा योग्यता-आधारितां सुनिश्चितं करोति ।

# द्वादशी कक्षायाः वार्षिक परीक्षायाः उत्तरपुस्तिकानां प्रतिलिपिं प्राप्तुं आवेदनस्य अन्तिमा तिथिः एकदिवसपर्यन्तं वर्धिता

केंद्रीय माध्यमिक शिक्षा परिषद् सीबीएसई इत्यनेन द्वादशी कक्षायाः वार्षिक परीक्षायाः उत्तरपुस्तिकानां प्रतिलिपिं प्राप्तुं आवेदनस्य अन्तिमा तिथिः एकदिवसपर्यन्तं वर्धिता । पूर्व एषा तिथिः अद्य यावत् आसीत्। सीबीएसई इत्यनेन उक्तं यत् गतदिनेभ्यः जालपुटे अभूतपूर्व-परिचालनभारस्य तथा अनधिकृत-हस्तक्षेपस्य अनेकप्रयत्नानां कारणेन जालपुटस्य कार्यं व्यवधानम् उत्पन्नम्। अतः एषः निर्णयः स्वीकृतः। सीबीएसई इत्यनेन सूचितं यत् छात्राः स्वस्य उत्तरपुस्तिकानां प्रतिलिपिं प्राप्य अङ्कानां सत्यापनस्य अथवा पुन-मूल्याङ्कनस्य अग्रिम-चरणाय आवेदनं कर्तुं द्विदिनात्मकं समयं प्राप्स्यन्ति। सहैव अभ्यर्थिनः विस्तारित समयसीमायाः उपयोगं कृत्वा प्रक्रियां सम्पूर्णां कुर्वन्तु।

# इबोला- संक्रमणम्- विश्व-स्वास्थ्य-सङ्गठनेन पूर्वमेव एषः प्रकोपः 'अन्तर्राष्ट्रिय-चिन्तायाः सार्वजनिक-स्वास्थ्य-आपातकालत्वेन घोषितः

विश्व-स्वास्थ्य-सङ्गटनेन सूचितं यत् 'डेमोक्रेटिक रिपब्लिक ऑफ काङ्गो' देशे इबोला-संक्रमणस्य 'बुन्दिबुग्यो' प्रभेदस्य सार्वजनिक-स्वास्थ्य-सङ्कटं राष्ट्रियस्तरे उच्चतः अतीव-उच्चस्तरे वर्धितम्। सङ्घटनस्य महानिदेशकः टेड्रोस अधानोम घेब्रेसस अवदत् यत् अस्य संक्रमणस्य सङ्कटं सम्प्रति राष्ट्रियस्तरे 'अतीवाधिकं', क्षेत्रीयस्तरे 'अधिकं', वैश्विकस्तरे च 'न्यूनम्' इति मूल्याङ्कितम् अस्ति। सः स्पष्टीकृतवान् यत् अधुना यावत् द्वयशीति प्रकरणेषु सप्तजनाः मृताः, परन्तु वास्तविक्-प्रकोपः एतस्मात् बृहत्तरः भवितुं शक्नोति; यतः प्रायः पंचाशदधिकसप्तशत सन्दिग्ध-प्रकरणानि, सप्तसप्तत्यधिकैकशत सन्दिग्धमृत्यवः च पञ्जीकृताः सन्ति। विश्व-स्वास्थ्य-सङ्गठनेन पूर्वमेव एषः प्रकोपः 'अन्तर्राष्ट्रिय-चिन्तायाः सार्वजनिक-स्वास्थ्य-आपातकालत्वेन घोषितः, तथापि स्पष्टीकृतं यत् एषा स्थितिः 'वैश्विक-महामारी' स्तरे नास्ति।

# प्रशासनं २०४७ पर्यन्तं "विकसितं भारतम्" इति स्वप्नं साकारयितुं प्रतिबद्धम् अस्ति-सूचना-प्रसारण-राज्यमन्त्री एल मुरुगन



संसदीयकार्य तथा सूचना-प्रसारण-राज्यमन्त्री एल मुरुगन अवदत् यत् प्रशासनम् सप्तचत्वारिंशदधिकद्विसहस्रतमवर्षपर्यन्तं "विकसितं भारतम्" इति स्वप्नं साकारयितुं प्रतिबद्धम् अस्ति। चेन्नई-स्थिते आई सी एफ इति संस्थाने आयोजितं आजीविकामेलकं सम्बोधयन् सः उक्तवान् यत् नरेंद्र मोदिनः नेतृत्वे देशः आधारभूतसंरचनायाः-विकासे, डिजिटलीकरणे, वृत्यवसराणां-वृद्धौ तथा च व्यापार-सुगमतायां तीव्रगत्या प्रगतिं करोति।

# बिहारराज्ये आगामिषु पञ्च-वर्षेषु एकलक्ष-शिक्षकाणां नियुक्तिः भविष्यति-मुख्यमन्त्री

बिहार-राज्यस्य मुख्यमन्त्री सम्राट चौधरी उद्घोषितवान् यत् आगामिषु पञ्च-वर्षेषु राज्ये एकलक्ष-शिक्षकाणां नियुक्तिः भविष्यति। शिक्षा विभागस्य उच्चस्तरीय-समीक्षोपवेशने मुख्यमन्त्रिणा अधिकारिणः निर्दिष्टाः यत् प्रतिवर्षं न्यूनातिन्यूनं विंशति-सहस्रं शिक्षकाणां नियुक्तिः सुनिश्चिता भवेत्। सः अवदत् यत् नियुक्ति प्रक्रियां सुगमां कर्तुं शिक्षक नियुक्तेः अधिसूचना इदानीं प्रतिवर्षं जुलाई-मासे एव प्रसारयिष्यते। अवधेयं यत्, शिक्षा मन्त्री मिथिलेश तिवारी अवदत् यत् मुख्यमन्त्रिणः अनया घोषणया शिक्षक-नियुक्ति-परीक्षायाः चतुर्थ चरणं प्रति अनिश्चिततायाः स्थितिः समाप्ता अभवत्। सः सूचितवान् यत् शिक्षा विभागः शीघ्रमेव रिक्तानां शिक्षक-पदानां मूल्याङ्कनं विधाय अग्रे नियुक्त्यर्थं नूतनं याचना-पत्रं प्रेषयिष्यति।

# 'आईपीएल' इत्यस्य प्रथमां स्पर्धां खेलितुं धर्मशालां प्राप्ता 'गुजरात टाइटंस' दलम्




**हिमसंस्कृतवार्ताः - धर्मशाला।** अन्ताराष्ट्रिय-क्रिकेट-क्रीडाङ्गण-धर्मशालायां 'आईपीएल-२०२६' इत्यस्य प्रथम-'क्वालिफायर-१' द्वन्द्वं लक्ष्यीकृत्य कौतुकं (रोमाञ्चः) चरमोत्कर्षं प्राप्तवत्। अस्यामेव शृङ्खलायां 'गुजरात टाइटंस' दलं नायकस्य (कप्तान) शुभमन-गिल-महोदयस्य नेतृत्वे शनिवासरे धर्मशालां प्राप्तवत्। 'गगल'-विमानपत्तने (Air port) प्रशंसकैः अनुरागिभिः क्रीडकानां सोत्साहं (गर्मजोशी से) स्वागतं विहितम्। 'गुजरात टाइटंस' दलं २६ मई दिनाङ्के रात्रौ सार्ध-सप्तवादने (७:३०) 'रॉयल चैलेंजर्स बेंगलुरु' (RCB) दलस्य विरुद्धं प्रथम-'क्वालिफायर' द्वन्द्वं खेलिष्यति। अपरतः, 'आरसीबी' दलस्य रविवासरे अपराह्न-पर्यन्तं धर्मशालां प्राप्तुं सम्भावना वर्तते।'आईपीएल' इत्यस्य १९ तमस्य संस्करणस्य प्रथम-'क्वालिफायर' स्पर्धा प्रथमतया धर्मशालायाम् आयोज्यते। 'रॉयल चैलेंजर्स बेंगलुरु' दलस्य समीपे धर्मशालायां खेलनस्य श्रेष्ठः अनुभवः अस्ति। 'आरसीबी' दलेन अस्मिन्नेव क्रीडाङ्गणे 'लीग'-द्वन्द्वे 'पंजाब किंग्स' दलं पराजित्य अङ्कतालिकायां (Points table) शीर्षस्थानं सुनिश्चितं कृतम् आसीत्। अनेन दलस्य कृते अत्रत्यानां परिस्थितीनां श्रेष्ठः अवबोधः अस्ति। द्वितीयपक्षे, 'गुजरात टाइटंस' दलं प्रथमतया धर्मशालायां किमपि 'आईपीएल' द्वन्द्वं खेलिष्यति। यद्यपि दलस्य बहवः क्रीडकाः 'रणजी ट्रॉफी' तथा आन्तरिक-एकदिवसीय-द्वन्द्वानां (घरेलू वनडे) काले अस्मिन् क्रीडाङ्गणे खेलितवन्तः, येन तेषाम् अत्रत्य-पिच-ऋत्वोः स्वल्पः अनुमानः वर्तते।

क्रीडा-द्वन्द्वं लक्षीकृत्य 'एचपीसीए' (HPCA) क्रीडाङ्गणे समीपस्थ-क्षेत्रेषु च सुरक्षा-व्यवस्था कठोरा कृता अस्ति। आरक्षक-दलेन (Police) प्रशासनेन च यातायात-वाहनस्थानक (पार्किंग)-दर्शकानां सुविधायै विशिष्टः प्रारूपः (खाका) सज्जः कृतः। २६ मई दिनाङ्के भवितव्यं एतत् द्वन्द्वम् अतीव प्रमुखं वर्तते, यतो हि एतत् विजयमानं दलं साक्षात् 'आईपीएल-२०२६' इत्यस्य अन्तिम-द्वन्द्वे (Final) प्रवेशं प्राप्स्यति, यदा तु पराजितं दलं पुनः एकम् अवसरं प्राप्स्यति। अस्मात् महतः द्वन्द्वात् स्थानीय-होटल-व्यवसायिभ्यः व्यापारिभ्यश्च श्रेष्ठ-व्यापारस्य आशा वर्तते।




# अमरीकादेशस्य विदेशमन्त्री मार्को रुबियो भारतयात्राप्रसङ्गे कोलकाता-नगरं सम्प्राप्तवान्

अमरीकादेशस्य विदेशमन्त्री मार्को रुबियो गतप्रातः चतुर्दिवसात्मके भारतयात्राप्रसङ्गे कोलकाता-नगरं सम्प्राप्तवान्। द्विपक्षीय-सम्बन्धान् सुदृढीकर्तुं सहैव वाणिज्य-रक्षा-ऊर्जासुरक्षा-प्रौद्योगिकी-हिन्दप्रशान्तव्यूहरचना इत्यादिषु क्षेत्रेषु सहयोगस्य विस्तारार्थं एषा तस्य प्रथमा भारतयात्रा अत्यन्तं महत्त्वपूर्णा वर्तते। भारते नियुक्तः अमरीकी राजदूतः सर्जियो गोरः कोलकाता-विमानपत्तने रुबियो महोदयस्य स्वागतं कृतवान्। विमानपत्तनात् आगमनानन्तरं सः सद्यः एव कोलकाता-नगरस्थं सेन्ट-टेरेसायाः 'मिशनरीज् ऑफ चैरिटी' इत्यस्य मुख्यकार्यालयं 'मदर हाउस' तथा बाल-आश्रमं च दृष्टवान् । प्रधानमन्त्री नरेन्द्रमोदी तथा अमरीकादेशस्य विदेशमन्त्री मार्को रुबियो च 'भारत-अमरीका व्यापक-वैश्विक रणनीतिक-संधिं सुदृढयितुं चर्चा कृतवन्तौ। प्रधानमन्त्री कार्यालयस्य विज्ञप्त्यनुसारं, विदेशमन्त्रिणा रुबियो महोदयेन रक्षा, रणनीतिक-प्रौद्योगिकी, व्यापार-निवेशौ, ऊर्जासुरक्षा, सम्पर्कः, शिक्षा तथा पारस्परिक जनसम्बन्धाः इत्यादिषु विविधक्षेत्रेषु द्विपक्षीय-सहयोगस्य निरन्तर-प्रगतेः विषये प्रधानमन्त्री सूचितः। अस्मिन् अवसरे श्रीमोदी शान्तिप्रयासेषु भारतस्य निरन्तरं समर्थनं दृढीकृतवान्, तथा च 'सम्भाषण-कूटनीति' माध्यमेन विवादानां शान्तिपूर्ण-समाधानस्य आह्वानं पुनः अकरोत्।

# हिमाचलस्य विद्यालयेषु अधुना छात्राः कृत्रिम-प्रज्ञां (एआई) शिक्षिष्यन्ते, विशेषज्ञैः मिलित्वा सज्जः कृतः नूतनः पाठ्यक्रमः

**हिमसंस्कृतवार्ताः - धर्मशाला।** हिमाचलप्रदेश-विद्यालयीय-शिक्षा-मण्डलं (HPBOSE) अधुना षष्ठी-कक्षातः द्वादशी-कक्षा-पर्यन्तं छात्रेभ्यः 'कृत्रिम-प्रज्ञा' (Artificial Intelligence - AI) एकस्य नूतन-कौशल-विषयस्य (Skill subject) रूपेण प्रारब्धुं सज्जतां करोति। छात्रान् भविष्यस्य तन्त्राणां (technologies) कृते सज्जं कर्तुं उद्देश्येन शिक्षा-मण्डलेन अस्य कृते विश्वप्रसिद्धया 'इण्टेल इण्डिया' (Intel India) कम्पनी-संस्थया सह हस्तमिश्रणं कृतं, या एतं पाठ्यक्रमं सज्जं कर्तुं साहाय्यं विधास्यति। शिक्षा-मण्डलं छात्राणां वयसः अनुगुणं कृत्रिम-प्रज्ञायाः (एआई) नूतनं पाठ्यक्रमं (Syllabus) रचयति। अस्य पाठ्यक्रमस्य मुख्यम् उद्देश्यं छात्राणां वैचारिक-क्षमतायाः वर्धनं, सङ्गणकस्य (Computer) अवबोधनं, नूतन-सृजनस्य कला-शिक्षणं तथा कस्यापि समस्यायाः सुलभतया समाधानस्य कौशल-शिक्षणं वर्तते। अस्मिन् विषये पुस्तकीय-ज्ञानात् अधिकं क्रियात्मक-शिक्षणे (Practical / करके सीखने पर) बलं प्रदास्यते, येन छात्राः सङ्गणकस्य तन्त्रज्ञानस्य च जगत् सम्यग्रूपेण ज्ञातुं शक्नुयुः।

**'एआई'-विशेषज्ञैः मिलित्वा सज्जः कृतः पाठ्यक्रमः**

एतं नूतनं पाठ्यक्रमं श्रेष्ठं कर्तुं शिक्षा-मण्डलेन एका विशिष्टा 'एआई-विशेषज्ञ-समितिः' (Expert Committee) निर्मिता। अस्याः समित्याः तत्त्वावधाने २२, २३ मई दिनाङ्कयोः द्विदिवसीय एका कार्यशाला (Workshop) आयोजिता, यस्याः अध्यक्षता डॉ. (मेजर) विशालशर्मणा कृता। अस्मिन् उपवेशने 'इण्टेल इण्डिया', हिमाचल-केन्द्रीय-विश्वविद्यालयस्य (CUHP) धर्मशाला-महाविद्यालयस्य च प्राध्यापकैः (Professors) सह अनेकेषां विद्यालयानां 'एआई'-विशेषज्ञाः सम्मिलिताः अभवन्। एतैः सर्वैः मिलित्वा एतादृशः पाठ्यक्रमः सज्जः कृतः यः वर्तमान-समयस्य आवश्यकतानां अनुसारं छात्राणां कृते उपयोगावहः भवेत्।

हिमाचलप्रदेश-स्कूल-शिक्षा-मण्डलस्य अध्यक्षस्य डॉ. राजेशशर्मणः कथनं वर्तते यत्— "शिक्षा-मण्डलं 'इण्टेल इण्डिया' च मिलित्वा छात्रान् शिक्षकांश्च भविष्यस्य कृते सज्जीकुर्वन्तः सन्ति। वयं विद्यालयेषु अध्ययनस्य एतादृशं वातावरणं निर्मातुम् इच्छामः यत्र छात्राः नूतन-तन्त्राणि सुलभतया शिक्षितुं शक्नुयुः। अस्मिन् नूतने 'एआई'-पाठ्यक्रमे तन्त्रस्य मूलभूत-अवबोधनेन सह तस्य समीचीनः सुरक्षितश्च उपयोगः अपि शिक्षिष्यते। अस्माकम् एषः एव प्रयासः अस्ति यत् हिमाचलस्य छात्राः तान्त्रिकरूपेण (Technically) सुदृढाः भवेयुः।"

# अन्तर्जालपुटेषु (वेबसाइट्स) अवास्तविक-परामर्श-सङ्ख्याभिः 'साइबर'-वञ्चनायाः सङ्कटम्, एषः अस्ति रक्षणस्य उपायः



**हिमसंस्कृतवार्ताः - शिमला।** ऑनलाइन-अन्तर्जालपुटेषु अवास्तविक-परामर्श-सङ्ख्याभिः (फर्जी कस्टमर केयर नंबर) 'साइबर'-सुरक्षायाः सङ्कटं वर्धितम् अस्ति। यदि भवान् अधिकोषेषु (बैंकों में) कोषधारकः अस्ति तथा स्वकीय-अधिकोष-शाखायाः परामर्श-सङ्ख्यां 'गूगल' (Google) माध्यमेण अन्विष्यति, तर्हि एवं मा करोतु। स्व-समस्यानां समाधानाय यां सङ्ख्यां भवान् प्राप्नोति, सा भवतः कष्टं अपि वर्धयितुं शक्नोति। सम्प्रति एव अधिकोषैः एका प्रबोधन-पत्रिका (Advocacy/Advisory) निर्गता, यस्यां विज्ञापितं यत् अन्तर्जाले (Internet) परामर्श-सङ्ख्यानाम् अन्वेषणकाले याः सङ्ख्याः सम्मुखं आयान्ति, तासु अधिकांश-सङ्ख्याः कूट-पूर्णाः (फर्जी) भवन्ति।यदि भवान् एतासु कूट-सङ्ख्यासु दूरभाषं करोति, तर्हि भवता प्रदत्ताभिः सूचनाभिः भवान् वञ्चनायाः ग्राही भवितुं शक्नोति। 'साइबर'-अपराधं कुर्वन्तः वञ्चकाः देशस्य बृहताम् अधिकोषाणां कूट-परामर्श-सङ्ख्याः अन्तर्जाले स्थापितवन्तः (Upload) सन्ति। यदा कश्चित् उपभोक्ता एतासु सङ्ख्यासु दूरभाषं करोति, तदा ते 'साइबर'-वञ्चकाः अधिकोषस्याधिकारिणः भूत्वा भवतः सर्वाणि विवरणानि गृह्णन्ति, ततः परं स्वल्पे एव काले भवतः धनकोषं (Account) रिक्तं कुर्वन्ति। 'साइबर'-वञ्चकेभ्यः रक्षणार्थं 'साइबर सेल शिमला' संस्थाया अपि एका प्रबोधन-पत्रिका निर्गता अस्ति।रक्षणस्य उपायः समीचीनं ज्ञानम् यदि भवतः अधिकोषेण सह किमपि कार्यं वर्तते, तर्हि भवान् अधिकोषस्य आधिकारिकं जालपुटं (Official Website) गच्छतु, तत्र प्रदत्ताभिः सङ्ख्याभिः एव सम्पर्कं करोतु। एतदतिरिच्य, अधिकोषस्य प्रलेखेषु (दस्तावेजों पर) अपि एताः सङ्ख्याः अङ्किताः भवन्ति। तैः उक्तं यत् यदि कदापि किमपि सन्देहः भवेत्, तर्हि सद्यः एव केन्द्रसर्वकारस्य विशिष्ट-'साइबर'-अपराध-विरोधि-शिकायत-सङ्ख्यायां १५५२६० उपरि दूरभाषणं कृत्वा पूर्णं विवरणं ददातु।

# बिहारराज्यशासनम् औद्योगिकविकासस्य तीव्रवर्धनम् त्रिशतपञ्चाशत् कोटिरूप्यकपरिमितेन निवेशेन द्विसहस्रत्रिशत् रोजगारावसराणां सर्जनम्

## विंशतिप्रस्तावानां परियोजनानां परियोजना-स्वीकृतिसमित्याः (पीसीसी) सभायां अनुमोदनम्

**हिमसंस्कृतवार्ताः- राघव नाथ झा, पटना।** बिहारराज्यस्य उद्योगविभागान्तर्गतं बिहार- औद्योगिक-क्षेत्रविकास- प्राधिकरणेन (बियाडा) परियोजना-स्वीकृतिसमित्याः (पीसीसी) सभा सम्यक् सम्पन्ना। अस्यां सभायां उद्योगविभागस्य सचिवस्य सह प्रबन्धनिर्देशकस्य बियाडा-आईडा इत्यनयोः कुन्दनकुमारस्य अध्यक्षतायां विंशतिः औद्योगिकपरियोजनाः अनुमोदिताः, येषां निमित्तं प्रायः त्रिंशत् एकरपरिमितस्य भूमेः आवंटनं विहितम्। एतेषां प्रस्तावितपरियोजनानां माध्यमेन राज्ये प्रायः त्रिशतपञ्चाशत् कोटिरूप्यकपर्यन्तः निवेशः संभाव्यते, येन लगभगं द्विसहस्रत्रिशतजनानां कृते प्रत्यक्षरूपेण रोजगारावसराणां सर्जनं भविष्यति।
माननीया उद्योगमन्त्री श्रेयसी सिंह उक्तवती यत् राज्ये अनुमोद्यमानाः नूतनाः औद्योगिकपरियोजनाः बिहारस्य औद्योगिक तथा प्रौद्योगिकविकासाय नूतनां दिशां प्रददति। एताभिः परियोजनाभिः स्थानीययुनां कृते विशालपरिमाणेन रोजगारावसराः, कौशलाधारिताः अवसराः च सृज्यन्ते। बिहारराज्यशासनं निवेशकानां कृते अनुकूलपरिसरनिर्माणेन राज्यम् आधुनिक-औद्योगिक- उत्पादनकेन्द्रत्वेन प्रतिष्ठापयितुं सततं प्रयतते।उद्योगविभागस्य सचिवः सह बियाडा-आईडा प्रबन्धनिर्देशकः कुन्दनकुमारः उक्तवान् यत् राज्यशासनं समतुलितस्य समग्रस्य च औद्योगिकविकासस्य प्रति दृढप्रतिबद्धतां धारयति।



बियाडा-माध्यमेन पारदर्शिप्रक्रियया समयबद्धरूपेण च निवेशकानां कृते औद्योगिकभूमिखण्डानां आबंटनं क्रियते। सुदृढाधारसंरचना, उत्कृष्टा परिवहनसम्पर्कता, सुगमप्रशासनिकप्रक्रियाः तथा नीतिसहयोगः च माध्यमेन निवेशकानां कृते अनुकूलपरिसरः सुनिश्चितः क्रियते, येन परियोजनानां शीघ्रतरं प्रभावी च क्रियान्वयनं सम्भवति। समित्याः अनुमोदितेषु परियोजनासु खाद्यसंस्करणम्, संगणकाधारित-प्रणालीविकासः, पूर्वनिर्मित- इस्पातसंरचनानिर्माणम्, फर्नीचरनिर्माणम्, पॉलिविनाइल- क्लोराइड तथा यूपिवीसी- नलिकानिर्माणम्, संपीडित- जैववायुगैस-उत्पादनम्, स्वास्थ्यसेवाउद्योगः तथा सामान्य-उत्पादन-उद्योगाः इत्यादयः विविधाः क्षेत्राः अन्तर्भवन्ति। एतेन राज्यस्य औद्योगिकाधारः सुदृढतां गमिष्यति तथा स्थानीयस्तरे आर्थिकक्रियाकलापानां विस्तारः भविष्यति। एते औद्योगिकएककाः राज्यस्य विविधेषु औद्योगिकक्षेत्रेषु स्थाप्यन्ते, यत्र प्रमुखाः सन्ति- कुमारबाग- औद्योगिकक्षेत्रम्, बेगूसराय- औद्योगिकसमूहः, हाजीपुर- औद्योगिकक्षेत्रम्, पाटलिपुत्र- औद्योगिकक्षेत्रम्, बरियारपुर- औद्योगिकक्षेत्रं, सासाराम- औद्योगिकक्षेत्रम्।
प्रमुखस्वीकृतसंस्थासु भारत- जैवऊर्जा- निगमः, क्रिस्पानो- खाद्य- पेय- उत्पादनसंस्था, कार्यबल-विकास-संस्थानम्, एक्स्पेरिया प्रीफैक्सो प्राइवेट लिमिटेड, रयुष-स्वास्थ्यसेवा-संस्था तथा मखायो-खाद्य- उत्पादक- संस्था इत्यादयः अन्तर्भवन्ति। एषां परियोजनानां क्रियान्वयनेन राज्ये औद्योगिक-क्रियाकलापानां नवोन्मेषः भविष्यति तथा युवजनानां कृते स्वावलम्बनस्य रोजगारस्य च नूतनाः अवसराः वर्धिष्यन्ते।

# हेरिटेज-भवनानां संरक्षणं संस्कृतिरक्षणसमम्, ऐतिहासिक-धरोहराणां त्वरितं संरक्षित-सूचौ समावेशाय प्रबलाः प्रार्थनाः



हिमसंस्कृतवार्ता, डॉ. राघव नाथ झा। भारतीय-राष्ट्रीय-कलानिधि-संरक्षण-संस्था पाटलिपुत्र-चैप्टरः तथा बिहार-पुरातत्त्वविद्-परिषदः, पाटलिपुत्रम् इत्यनयोः संयुक्ततत्त्वावधाने आयोजितायां संगोष्ठ्यां “पाटलिपुत्र-नगरस्य विरासत-भवनानि—दशा च दिशा” इति विषये, विद्वद्भिः, शिक्षाविद्भिः, शोधकर्तृभिः तथा विरासत-प्रेमिभिः सह ऐतिहासिक-भवनानां संरक्षणविषये गम्भीर-चिन्ता प्रकटिता। सर्वैः एकमत्या प्रतिपादितं यत् एतानि धरोहर-भवनानि अविलम्बेन संरक्षणीयानि, तथा तेषां संरक्षित-स्मारक-सूच्यां शीघ्रं समावेशः अनिवार्यः अस्ति। अस्मिन् अवसरे मुख्यवक्त्रा श्रीप्रेमशरणेन सुलतान-महालयस्य ऐतिहासिक-महत्त्वं निरूप्य उक्तं यत् येषां जनानां सांस्कृतिक-ऐतिहासिक-कलात्मक-विरासतां प्रति सम्यग्बोधः नास्ति, ते एव तस्यां आघातं कुर्वन्ति। तेन प्रतिपादितं यत् ये भवनाः ऐतिहासिक-कलात्मक-पुरातात्त्विक-दृष्ट्या महत्त्वन्तः सन्ति, ते अविलम्बेन संरक्षित-स्मारक-सूच्यां निवेशनीयाः, येन भावि-पीढयः स्वकीय-गौरवपूर्ण-इतिहासेन सह सम्बद्धाः स्युः। अस्मिन्नेव परिसरे सौम्याञ्चल-वर्या द्वारा विरचितस्य “पाटलिपुत्र-कलम-चित्रकला—आर्ट, हिस्ट्री, रिवाइवल” इति ग्रन्थस्य लोकार्पणं सम्पन्नम्। तत्र श्रीप्रेमशरणेन उक्तं यत् पाटलिपुत्र-कलम-चित्रकला न केवलं कलाशैली, अपितु ऐतिहासिक-सामाजिक-सांस्कृतिक-परिस्थितीनां जीवन्त-प्रमाणम् अस्ति, या स्वकालस्य यथार्थ-इतिहासं सुस्पष्टतया निरूपयति।भारतीय-प्रौद्योगिकी-संस्थानस्य (पाटलिपुत्रम्) प्राध्यापिका कामिनीसिन्हा उक्तवती यत् यावत् जनाः स्वकीयां विरासतां आत्मीयत्वेन न स्वीकुर्वन्ति, तावत् तस्य संरक्षणं दुष्करम् एव। तया इदमपि प्रतिपादितं यत् पाटलिपुत्र-नगरस्य इतिहासः त्रिंशत्सहस्राधिक-वर्ष-पुरातनः अस्ति, तथा तत्र स्थितानि ऐतिहासिक-भवनानि तस्य जीवित-प्रमाणानि सन्ति; तेषां विना इतिहासः अपूर्णः खण्डितश्च भवति।अपरतः प्राध्यापिका अनुश्री-बर्मणा रूपा-झा इत्यनया प्रस्तुतायाः छायाचित्र-प्रदर्शिन्याः माध्यमेन पाटलिपुत्र-नगरस्य विरासत-भवनानां महत्त्वं रेखाङ्कितम्। तया उक्तं यत् सर्वाणि प्राचीन-भवनानि धरोहरत्वेन न ग्राह्याणि, किन्तु यथार्थ-धरोहर-भवनानां वैज्ञानिक-ऐतिहासिक-परीक्षणेन चयनं कृत्वा तेषां संरक्षणम् अत्यावश्यकम् अस्ति।
प्राध्यापिका अञ्जली-शर्मा बिहार-सरकारेण संरक्षित-स्मारकाणां वर्तमान-स्थितिं प्रति चिन्ता प्रकट्य हाजीपुर-स्थित-कोनहारा-घाटस्य नेपाली-मन्दिरस्य उदाहरणं प्रदत्तवती। तया उक्तं यत् अधिसूचित-धरोहराणां स्थितेः पुनःपरिशीलनं आवश्यकम्, यतः बहूनि महत्त्वपूर्णानि स्मारकाणि उपेक्षितानि सन्ति।
प्रोफेसर अनिलप्रसादेन धरोहर-संरक्षणाय सुदृढ-विधि-निर्माणस्य आवश्यकता प्रतिपादिता। तेन उक्तं यत् केवलं शासनाश्रयः पर्याप्तः न, अपितु समाजस्य अपि सक्रियभूमिका अनिवार्या अस्ति।
कार्यक्रमस्य अध्यक्षतां बिहार-संग्रहालयस्य पूर्व-निदेशकः डॉ. उमेशचन्द्र-द्विवेदी कृतवान्। तेन उक्तं यत् कदाचित् प्रशासनिकाः अधिकारिणः दबाववशात् अनुचित-निर्णयान् गृह्णन्ति, अतः विरासत-प्रेमिभिः सततं सजाग्रतया कार्यं कर्तव्यं तथा संरक्षणार्थं सक्रियभूमिका वहनीया।अस्मिन् अवसरि चलचित्र-निर्माता सुमित-सौरभेण निर्मितस्य पाटलिपुत्र-कलम-चित्राधारितस्य वृत्तचित्रस्य तथा वरिष्ठ-पत्रकार प्रबुद्ध-विश्वासेन सुलतान-महालयस्य इतिहासाधारितस्य लघु-वृत्तचित्रस्य प्रदर्शनं कृतम्, यत् उपस्थितैः दर्शकैः अत्यन्तं प्रशंसितम्।
कार्यक्रमस्य स्वागतं बिहार-पुरातत्त्वविद्-परिषदः संयोजकः भैरव-लाल-दासः कृतवान्, तथा धन्यवाद-ज्ञापनं सहसंयोजकः डॉ. शिवकुमार-मिश्रः अकरोत्।अस्मिन् अवसरि बहुसंख्यकाः विद्वांसः, कलाकाराः, शोधकर्तारः तथा विरासत-प्रेमिणः उपस्थिताः आसन्, सर्वैश्च एकस्वरेण ऐतिहासिक-धरोहर-संरक्षणस्य परमावश्यकता दृढतया प्रतिपादिता।



# नौतपाविषये शास्त्रीय-संस्कृतरूपेण विश्लेषणम्

*(ज्योतिषीय, प्राकृतिक- लोकपरम्परागत- वैज्ञानिक- आध्यात्मिक-दृष्ट्या)*

भारतीयज्योतिषगणनायाः सनातनपरम्परायाश्च अनुसारं 25 मई 2026 तः नौतपायाः प्रारम्भः भवति, यः 2 जून 2026 पर्यन्तं प्रवर्तिष्यते। अस्मिन् कालखण्डे सूर्यदेवस्य रोहिणी-नक्षत्रे सञ्चरणात् पृथिव्यां तापवृद्धिः, उष्णता-तीव्रता च अत्यधिकं वर्धते, येन भीषणग्रीष्मतापस्य सम्भावना प्रबलतां गच्छति। ज्योतिषशास्त्रमतानुसारं रोहिणीनक्षत्रे सूर्यस्थितौ वातावरणं शुष्कतां प्राप्नोति, उष्णवायवः च तीव्रतां वहन्ति, येन लू-प्रवाहः तापदाहः च वर्धते। शास्त्रीयपरम्परायां सूर्यः सर्वलोकप्रकाशकः ऊर्जा-स्रोतश्च इति वर्णितः-

*"सूर्यः सर्वस्य लोकस्य चक्षुः सदा प्रकाशकः।"*

वराहमिहिरेण बृहत्संहितायाम् उक्तम्-

*"नक्षत्रस्थित्यनुसारं वर्षा तापश्च जायते।"*

अर्थात् नक्षत्रस्थितेः अनुसारं पृथिव्यां वर्षा-तापयोः प्रभावः भवति। लोकपरम्परायां नौतपः रोहिणी-नक्षत्रे सूर्यसञ्चरणसमये अनुभूयमानः अतीव उष्णकालः इति मान्यते, यत्र वातावरणं अत्यन्तं तापयुक्तं शुष्कं च भवति।

*"ग्रीष्मे तपति भास्करः, वायवो वह्निसन्निभाः।"*

लोककविः घाघः उक्तवान्- "जेठमासे यदा तापः भवति, तदा पृथिवी अग्निसदृशी भवति। यदि नौदिनपर्यन्तं तस्य तापस्य सहनं भवेत्, तर्हि शुभवर्षायाः सम्भावना भवति।"

तथा- "जेठे तपति, आषाढे वर्षति, कृषकाणां मनः हर्षति।" वैज्ञानिकदृष्ट्या अयं कालः ऋतु-परिवर्तनस्य वायुमण्डलीय-दाबपरिवर्तनस्य च संक्रमणकालः इति मन्यते, यस्मिन् सूर्यकिरणानां तीव्रता अधिका भवति तथा उष्णलहराः प्रबलतां प्राप्नुवन्ति।

धार्मिक- आध्यात्मिक- दृष्ट्या अयं कालः सूर्योपासनायाः शिवभक्तेः च विशेषकालः इति परिगण्यते-

***"ॐ सूर्याय नमः तेजसे नमः।"***

***"ॐ नमः शिवाय शान्ताय जगत्कल्याणहेतवे।"***

अस्मिन् काले जलदानं, प्याऊसेवा, वृक्षारोपणं, जनसेवा च विशेषपुण्यकराणि कर्माणि भवन्ति। चिकित्साविशेषज्ञैः पर्याप्तं जलसेवनम्, लघु-आहारः, तीव्र-आतपे अनावश्यकगमनस्य परिहारः च उपदिश्यते। बालकाः, वृद्धाः, श्रमिकाश्च विशेषसावधानाः भवन्तु।


**-डॉ. राघव नाथ झा**
**उपनिदेशकः, ज्योतिर्वेदविज्ञानम्**

# निर्वाचन-आचारसंहितायाः मध्ये मन्त्रिमण्डलस्य उपवेशनस्य आयोजने सर्वकारात उत्तर-याचनम्



हिमसंस्कृतवार्ताः - शिमला। राज्य-निर्वाचन-आयोगेन निर्वाचन-आचारसंहितायाः मध्ये शुक्रवासरे मन्त्रिमण्डलस्य (कैबिनेट) उपवेशनस्य आयोजनेन सम्बद्धायाम् भाजपा-दलस्य उपालम्भ-पत्रिकायां कार्यविधिं कुर्वता राज्यसर्वकारात् स्पष्टीकरणं (जवाब) याचितम्। निर्वाचन-आयोगेन मुख्यसचिवं प्रति पत्रं प्रेष्य पृष्टं यत्— "अस्य उपवेशनस्य आयोजनात् पूर्वं आचारसंहिता ('कोड ऑफ कंडक्ट') सम्बद्धानां दिशा-निर्देशानां कथं ध्यानं स्थापितम्?" अस्मिन् विषये शीघ्रातिशीघ्रं प्रत्युत्तरं दातुं कथितम् अस्ति, अर्थात् अस्मिन् पत्रे कापि निश्चिता अन्तिमा तिथिः (Deadine) न अङ्किता। उल्लेखनीयं वर्तते यत् गतदिवसे राज्यसर्वकारस्य मन्त्रिमण्डलस्य उपवेशनं सञ्जातम् आसीत्, यस्मिन् बहवः निर्णयाः स्वीकृताः। माध्यम-पुटेसु (Media portals) प्रसारितायाः अस्याः वार्तायाः आधारेण भाजपा-दलेन राज्य-निर्वाचन-आयोगाय लिखिता उपालम्भ-पत्रिका प्रत्ता। एषा उपालंभ-पत्रिका भाजपा-पक्षस्य प्रदेश-माध्यम-संयोजकेन कर्णनन्दा इत्यनेन प्रेषिता आसीत्। अस्मिन् आचारसंहितायाः मध्ये स्वीकृतानां निर्णयानां अन्वेषणं कर्तुं तथा तेषां कार्यान्वयने सद्यः स्थगनं (रोक) प्रदातुं आयोगात् अभ्यर्थना कृता अस्ति। यैः अधिकारिभिः अस्य उपवेशनस्य कृते प्रकरणानि प्रक्रिया च आनीताः, तेषाम् उपरि दण्डात्मिका कार्यविधिः करणीया तथा भविष्यस्य कृते मार्गदर्शिका (Guideline) निर्गमनीया इति प्रार्थना कृता। यद्यपि एतां उपालम्भ-प्रक्रियाम् संसदीय-कार्य-उद्योगमन्त्री हर्षवर्धनसिंहचौहानः निरर्थिकां (गैर-जरूरी) प्रतिपादितवान्। तेन तर्कः प्रदत्तः यत् शिमला-नगरनिगमस्य परिधौ आचारसंहिता प्रवृत्ता नास्ति तथा नगर-निकायेषु निर्वाचनानि अपि सम्पन्नानि सन्ति। तेन कथितं यत् विविधानां वर्गाणाम् मानदेय-वर्धनेन अथवा महिलाभ्यः १५०० रूप्यकाणां प्रदानेन सम्बद्धाः घोषणाः पुरातनाः सन्ति, आयव्ययके (बजट) अपि एतासाम् उल्लेखः वर्तते; अतः अस्मिन् किमपि नूतनं नास्ति।

# "महाभाष्यकारस्य पतञ्जले परिचयम्"



"योगेन चित्तस्य पदेन वाचां, मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां, पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।

महामुनि पतञ्जलिविषये उक्तं पद्यमिदं सुप्रसिद्धमस्ति यत् अनेन मुनिना योगशास्त्रे, व्याकरणशास्त्रे, वैद्यकशास्त्रे च ग्रन्थरचना अकुर्वन्। अयं पाणिनीयव्याकरणमाश्रित्य महद्व्याख्यानं लिपिबद्धं चकार, यत् विपश्चितचेतांसि चमत्करोति। नीरसमपि व्याकरणशास्त्रं स्वकीयया अभिनव व्याख्याया सुतरां सरसाञ्चकार। महामुनिना पतञ्जलिना महाभाष्ये सूत्रवार्तिकयोरपूर्तिः [शेषः] परिपूर्तिमानीतेत्यस्माद् हेतोः स पदशेषकारतया संबोधितः। पदशेषकारकात्वात् तदीयमाभिधानं शेषः, नागनाथः, अहिपतिः प्रसिद्धमिति। भगवतः पतञ्जलेः शेषावतारत्वम् इति प्रसिद्धम्। महाभाष्यकारस्य पतञ्जलेः शैली वैदर्भीरीतिरस्ति, यस्याः स्वरुपम् अधोलिखितमस्ति-

**"अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः।**
**तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्।।"**

इत्थं व्याकरणसदृशो जटिलो नीरसश्च विषयो हृद्यतरेण चूर्णकाव्य गद्येन सरसीकृतो भगवता पतञ्जलिना।

**डा. वर्षा प्रकाश टोणगांवकर ®© पुणे / महाराष्ट्रम्**

# हास- परिहासम्

यः विषं पिबति सः महादेवः,
ये अमृतं पिबन्ति ते देवाः,
परञ्च
ये पत्न्याः क्रोधं पिबन्ति ते पतिदेवाः 😀 😀



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। अद्य मया अन्तर्जाले एका विचित्रा वार्ता पठिता। एका नववधूः विवाहोत्तरं स्वभर्त्रे एकं सुदीर्घं पर्यटन-इच्छा-सूचीपत्रं समर्पितवती अस्ति। तत् पत्रं दृष्ट्वा वरः अतीव खिन्नः जातः।

**काव्या-** नमस्ते नन्दिनि! सत्यं तत् चलच्चित्रं मया अपि दृष्टम्। वरस्य मुखं दृष्ट्वा हासः जातः। वरस्य कृते सः भारः एव अभूत्। तथापि दम्पत्योः एतादृशः विनोदः सुखकरः भवति। इतोऽपि एका वार्ता अस्ति। एका युवतिः स्व-कार्य-नियोजकाय अति-सरलं त्यागपत्रं प्रेषितवती अस्ति। तया तत्र लिखितम् यत् "मम मनसः स्वास्थ्यं नष्टं जातम्, अतः अहं कार्यं त्यजामि" इति।

**नन्दिनी-** आं काव्ये, तद् वृत्तं मया अपि अवगतम्। आधुनिक-युवकाः स्वकीय-मानसिक-स्वास्थ्यस्य विषये बहुजागरूकाः सन्ति इति अत्र स्पष्टं ज्ञायते। त्यागपत्रे नूतनशब्दानां प्रयोगः अतीव रोचते। कार्यस्य पीडा तु सर्वत्र वर्तते एव। परन्तु चीनदेशस्य एकस्मिन् महाविद्यालये एकः छात्रः धूम्रपानस्थाने उपवेष्टुम् आसनं याचितवान् अस्ति। तदा शिक्षकेण सः छात्रः तीव्रं भर्त्सितः। शिक्षकेण उक्तम् यत् "धूम्रपान-स्थानं विश्रामार्थं नास्ति, पुस्तकालयं गच्छ" इति।

**काव्या-** अहो! शिक्षकेण योग्यं वचनम् उक्तम्। धूम्रपानं हानिकारकं वर्तते, तस्य कृते सुख-सुविधा न दातव्या इति शिक्षकेण सम्यक् ज्ञापितम्। एतादृशम् अनुशासनं छात्रेभ्यः अतीव आवश्यकम् अस्ति। परन्तु अस्माकं भारते तु सर्वदा उत्तम-संस्काराः प्राप्यन्ते। लिथुवेनिया-देशीया एका महिला अन्तर्जाले भारतस्य पञ्च मूल्यानि श्लाघितवती अस्ति।

**नन्दिनी-** सत्यम्, मया अपि तस्याः भाषणं श्रुतम्। तया भारतीय-जीवनस्य भूरि प्रशंसा कृता। वैदेशिकैः अपि अस्माकं संस्कृतेः महत्त्वं ज्ञायते इति गौरवस्य विषयः। तया उक्तानि पञ्च मूल्यानि सन्ति- अतिथिसत्कारः, सामाजिकसहयोगः, सहभोजनं, स्वच्छता, आनन्दमय-जीवनञ्च। एतैः मूल्यैः एव भारतं जगति प्रसिद्धं जातम्।

**काव्या-** सुष्ठु उक्तम् त्वया नन्दिनि। एतेषां मूल्यानां पालनं सर्वैः कर्तव्यम्।

अद्यतनः कार्यक्रमः अत्रैव समाप्यते। पुनर्मेलिष्यामः।

# त्रिभाषासूत्रसन्दर्भे संस्कृतस्य स्थानम्(राष्ट्रियशिक्षानीतिः2020)




## (डॉ विमलेश झा, गंगौली, राजे, मधुबनी,बिहार)

भारतीयसंस्कृतेः मूलाधारभूता संस्कृतभाषा केवलं प्राचीना भाषा नास्ति, अपितु सा भारतीयज्ञानपरम्परायाः, आध्यात्मिकचिन्तनस्य, वैज्ञानिकवाङ्मयस्य, सांस्कृतिकैक्यस्य च आधारशिला अस्ति। भारतस्य शिक्षानीतौ भाषाशिक्षणस्य विशेषं स्थानं दृश्यते। तस्मिन्नेव सन्दर्भे “त्रिभाषासूत्रम्” इति नीतिः अत्यन्तमहत्त्वपूर्णा वर्तते। एषा नीतिः विद्यार्थिनां बहुभाषिकक्षमतां वर्धयितुं, राष्ट्रियैक्यं दृढीकर्तुं, विविधभाषासंरक्षणं च कर्तुं निर्मिता अस्ति। अस्मिन् त्रिभाषासूत्रे संस्कृतभाषायाः स्थानं विशेषरूपेण गौरवपूर्णं, प्रेरणादायकं च अस्ति। त्रिभाषासूत्रस्य अवधारणा प्रथमं कोठारीआयोगस्य (1964-66) अनुशंसया प्रस्तुताभूत् तथा 1968 तमे वर्षे राष्ट्रियशिक्षानीतौ स्वीकृता। अस्य सूत्रस्य मुख्योद्देश्यं विद्यार्थिनः मातृभाषां, राष्ट्रभाषां, अन्यां भारतीयभाषां वा अध्यापयितुम् आसीत्। सम्प्रति राष्ट्रियशिक्षानीतौ (NEP 2020) अपि त्रिभाषासूत्रस्य पुनः सुदृढीकरणं कृतम्।

संस्कृतभाषा भारतीयसंस्कृतेः आत्मा इति कथ्यते। वेदाः, उपनिषदः, पुराणानि, रामायणम्, महाभारतम्, दर्शनशास्त्राणि, आयुर्वेदः, गणितम्, ज्योतिषम्, नाट्यशास्त्रम् इत्यादयः ग्रन्थाः अस्यां भाषायामेव रचिताः सन्ति । अतः संस्कृतं केवलं भाषामात्रं न, अपितु सम्पूर्णभारतीयज्ञानपरम्परायाः भाण्डागारम् अस्ति। एतादृशी भाषा यदि शिक्षायाः मुख्यधारायां न स्थाप्येत, तर्हि भारतस्य सांस्कृतिकमूलानि दुर्बलानि भवेयुः।त्रिभाषासूत्रे संस्कृतस्य स्थानं बहुविधरूपेण दृश्यते। बहुषु विद्यालयेषु संस्कृतं तृतीयभाषारूपेण अध्याप्यते। विशेषतः माध्यमिकस्तरे छात्राः संस्कृतभाषायाः चयनितविषयरूपेण स्वीकुर्वन्ति। एतेन विद्यार्थिनः भारतीयपरम्परायाः, शास्त्रज्ञानस्य, नैतिकमूल्यस्य च परिचयं प्राप्नुवन्ति। संस्कृताध्ययनं विद्यार्थिनां भाषिकक्षमताम् अपि वर्धयति, यतः संस्कृतभाषायाः व्याकरणव्यवस्था अतीव वैज्ञानिकी अस्ति।महर्षिपाणिनेः अष्टाध्यायीग्रन्थः विश्वस्य उत्कृष्टतमव्याकरणग्रन्थेषु अद्वितीयो मन्यते। आधुनिकभाषाविज्ञानिनः अपि संस्कृतभाषायाः संरचनात्मकवैज्ञानिकतां प्रशंसन्ति। संस्कृतस्य अध्ययनं विद्यार्थिनां तार्किकशक्तिं, स्मरणशक्तिं, भाषावैज्ञानिकबुद्धिं च विकसितं करोति। अतः त्रिभाषासूत्रे संस्कृतस्य समावेशः केवलं सांस्कृतिकदृष्ट्या न, अपितु बौद्धिकविकासस्य दृष्ट्यापि महत्त्वपूर्णः अस्ति।

राष्ट्रियशिक्षानीतिः 2020 बहुभाषिकतायाः समर्थनं करोति। अस्यां नीतौ स्पष्टतया उक्तं यत् छात्राः तिस्रः भाषाः अधीयेरन्, तासु द्वे भारतीयभाषे भवेताम्। संस्कृतभाषा सर्वेषां भारतीयभाषाणां मूलरूपत्वेन विशेषप्रोत्साहनं प्राप्नोति। नीतिपत्रे संस्कृतभाषायाः सरलरूपेण अध्यापनस्य, आधुनिकप्रणाल्या शिक्षणस्य, व्यवहारिकप्रयोगस्य च आवश्यकता निर्दिष्टा अस्ति।

संस्कृतभाषा भारतीयभाषानां जननी इति प्रसिद्धं वर्तते। हिन्दी, मराठी, बंगला, गुजराती, उड़िया, नेपाली, कन्नड, मलयाळम्, तेलुगु इत्यादीनां भाषाणां शब्दसम्पत्तौ संस्कृतस्य प्रभावः स्पष्टतया दृश्यते। अतः संस्कृताध्ययनं छात्राणां अन्यासां भारतीयभाषाणाम् अध्ययनमपि सुकरं करोति। त्रिभाषासूत्रस्य मुख्योद्देश्यं भाषासमन्वयः अस्ति, यस्मिन् संस्कृतस्य योगदानं अत्यन्तं महत्त्वपूर्णम् अस्ति।संस्कृतभाषा राष्ट्रियैकतायाः सेतुरपि अस्ति। भारतस्य विविधेषु प्रदेशेषु भिन्नभाषाः प्रयुज्यन्ते, किन्तु संस्कृतभाषा सर्वेषां समानसांस्कृतिकाधाररूपेण कार्यं करोति। “वसुधैव कुटुम्बकम्”, “सर्वे भवन्तु सुखिनः”, “सत्यमेव जयते” इत्यादयः संस्कृतवाक्यानि सम्पूर्णभारतीयमानसस्य प्रतिनिधित्वं कुर्वन्ति। अतः त्रिभाषासूत्रे संस्कृतस्य अध्ययनं राष्ट्रियभावनां सुदृढां करोति। आधुनिकयुगे अपि संस्कृतस्य उपयोगिता वर्धमाना दृश्यते। संगणकविज्ञानक्षेत्रे संस्कृतभाषायाः वैज्ञानिकव्याकरणसंरचना विशेषरूपेण चर्चिता अस्ति। कृत्रिमबुद्धिमत्ता (AI), भाषाप्रसंस्करणम् (NLP), यन्त्रानुवादः इत्यादिषु संस्कृताधारितशोधाः भवन्ति। भारतीयभाषासंसाधनविषये आधुनिकशोधकार्याणि संस्कृतस्य वैज्ञानिकमहत्त्वं प्रकाशयन्ति। विद्यालयेषु संस्कृतशिक्षणस्य प्रभावः नैतिकशिक्षायामपि दृश्यते। संस्कृतसाहित्ये धर्मः, सदाचारः, कर्तव्यनिष्ठा, गुरुभक्तिः, मातृपितृसम्मानम्, पर्यावरणसंरक्षणम् इत्यादीनि मूल्यानि प्रतिपादितानि सन्ति। सुभाषितानि विद्यार्थिनां जीवने प्रेरणां जनयन्ति। उक्तं च

**“विद्या ददाति विनयं विनयाद्याति पात्रताम्**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततः सुखम्।”**

एवं च संस्कृतशिक्षणेन केवलं भाषाज्ञानं न, अपितु व्यक्तित्वविकासोऽपि भवति।

त्रिभाषासूत्रस्य कार्यान्वयने संस्कृतस्य शिक्षणसम्बद्धाः कतिपयाः समस्याः अपि दृश्यन्ते। कतिपयविद्यालयेषु योग्यसंस्कृतशिक्षकाणां अभावः वर्तते। छात्राः संस्कृतं कठिनभाषा इति मन्यन्ते। शिक्षणपद्धतिः अपि प्रायः रटनप्रधानत्वेन दृश्यते। यदि संस्कृतं व्यवहारिकरूपेण, संवादमाध्यमेन, नाट्येन, गीतैः, डिजिटलमाध्यमेन च अध्याप्येत, तर्हि छात्रेषु संस्कृतप्रेम सहजतया वर्धेत। अद्य अनेकाः संस्थाः संस्कृतप्रचारकार्ये संलग्नाः सन्ति। संस्कृतभारती इत्यादीनि संगठनानि संस्कृतसंवादशिविराणि, प्रतियोगिताः, संस्कृतकक्षाः च आयोजयन्ति। एतेन संस्कृतं जनजीवने पुनः प्रतिष्ठां प्राप्नोति। प्रधानमन्त्री अपि संस्कृतप्रचारकार्यस्य प्रशंसां कृतवान्। त्रिभाषासूत्रे संस्कृतस्य स्थानं केवलं परम्परारक्षणार्थं न, अपितु भविष्यनिर्माणार्थमपि आवश्यकम्। संस्कृतं भारतस्य सांस्कृतिक-वैज्ञानिक-आध्यात्मिक-नैतिकसम्पदां धारयति। यदि नवीनसमूहः संस्कृतभाषायाः अध्ययनं करिष्यति, तर्हि सः स्वसंस्कृतेः मूलानि ज्ञातुं समर्था भविष्यति। आधुनिकविज्ञानेन सह संस्कृतस्य समन्वयः भारतस्य ज्ञानपरम्परां वैश्विकस्तरे पुनः प्रतिष्ठापयितुं शक्नोति। अन्ते च वयं वक्तुं शक्नुमो यत् त्रिभाषासूत्रे संस्कृतस्य स्थानम् अत्यन्तमहत्त्वपूर्णम् अस्ति। संस्कृतभाषा भारतीयसंस्कृतेः मेरुदण्डरूपा अस्ति। सा भाषिकैकतायाः, सांस्कृतिकगौरवं, नैतिकमूल्यं, वैज्ञानिकदृष्टिं च पोषयति। अतः विद्यालयेषु संस्कृतशिक्षणं सुदृढीकर्तुं, शिक्षणपद्धतिं आधुनिकीकर्तुं, संस्कृतस्य व्यवहारिकप्रयोगं प्रोत्साहयितुं च सर्वेषां प्रयत्नः आवश्यकः अस्ति। इत्थं संस्कृतभाषा न केवलं अतीतस्य धरोहररूपेण, अपितु भविष्यस्य मार्गदर्शिकारूपेण अपि प्रतिष्ठां प्राप्स्यति एव। सम्प्रति एकबारं पुनः संस्कृतज्ञानां संस्कृताध्येतृणां कृते स्वर्णिमः अवसरः आगतः यतो हि त्रिभाषासूत्रकारणात् संस्कृतेतरसामान्यविद्यालयेषु अपि संस्कृतभाषायाः शिक्षणं भविष्यति एव।अत्र समेषां संस्कृतशिक्षकानाम् इदं कर्तव्यमस्ति यत् ते स्वविद्यालयेषु संस्कृतशिक्षणाय प्रयासं कुर्युरिति।पठतु संस्कृतम्,जयतु भारतम् ।इत्यलम्।

# बिहारविद्यालयपरीक्षासमितेः परीक्षा-परिणामः प्रकाशितः, शिक्षामन्त्रिणा कृता उद्घोषणा




**हिमसंस्कृतवार्ताः- राघव नाथ झा, पटना।** बिहारविद्यालयपरीक्षासमित्या उच्चतर- माध्यमिक तथा प्राथमिक- माध्यमिक- कंपार्टमेंटल- सह- विशेषपरीक्षायाः परिणामः औपचारिकरूपेण प्रकाशितः। अस्मिन् अवसरे माननीयः शिक्षामन्त्री मिथिलेशतिवारीमहोदयः परिणामस्य उद्घोषणां कृतवान्। तत्र बिहारविद्यालयपरीक्षासमितेः अध्यक्षः आनन्दकिशोरमहोदयः अपि उपस्थितः आसीत्। सः परिणामविषये स्ववक्तव्यं प्रादत्तवान्। परिणामप्रकाशनानन्तरं सम्पूर्णः परीक्षाचक्रम् अस्य वर्षस्य वैशाखमासे एव सफलतया सम्पन्नः जातः इति समित्या सूचितम्। उत्तीर्णाः अभ्यर्थिनः अधुना कस्यापि अतिरिक्त-प्रतीक्षायाः आवश्यकता नास्ति इति स्पष्टीकृतम्।शिक्षामन्त्री उक्तवान् यत् राज्यसर्वकारः मेधावी- विद्यार्थिनः प्रोत्साहनाय निरन्तरं प्रयत्नशीलः अस्ति। सः इदमपि अवदत् यत् बिहार-राज्यम् अद्य देशस्य प्रथमं एतादृशं शिक्षापरीक्षा-मण्डलम् जातम् यत् सम्पूर्णं परीक्षाचक्रं समयबद्धरूपेण सम्पन्नवत्। अस्य उपलब्धेः कृते सः बिहारविद्यालयपरीक्षासमितिम् अभिनन्दितवान्।समित्या प्रकाशितानां सांख्यिकीयानुसारम्-उच्चतरमाध्यमिक- विशेष- परीक्षायां 3711 छात्र- छात्राः उत्तीर्णाः अभवन् तथा च 55.31 प्रतिशतं परीक्षार्थिनः सफलाः जाताः। अस्मिन् परीक्षायां छात्राणाम् उत्तीर्ण-प्रतिशतं 62.65 तथा छात्राणां 59.29 आसीत्। तथैव प्राथमिक- माध्यमिक- विशेष- परीक्षायां 57.18 प्रतिशतं परीक्षार्थिनः सफलतां प्राप्तवन्तः। अस्मिन् परीक्षायां छात्राणां उत्तीर्ण- प्रतिशतं 57.84 तथा छात्राणां 56.25 आसीत्। शिक्षामन्त्री उक्तवान् यत् बिहार-राज्ये एक-वातायन-प्रणाली नामकव्यवस्थायाः प्रवर्तनेन परीक्षाप्रक्रिया, परिणाम- प्रकाशनप्रक्रिया द्रुतगत्या सम्पन्ना भवति, यस्य सकारात्मकः प्रभावः स्पष्टतया दृश्यते। एतेन परिणामप्रकाशनेन बिहारविद्यालय- परीक्षासमितिः शिक्षाव्यवस्थायां पारदर्शितायाः तथा समयबद्धतायाः दिशि एकां महत्त्वपूर्णाम् उपलब्धिं प्राप्तवती।